॥ **ध्यानं** ॥

माणिक्यवीणामुपलाळयन्तीं मदालसां मञ्जुळवाग्विलासां ।
माहेन्द्रनीलद्युतिकोमळांगिं मातंगकन्यां मनसा स्मरामि ॥ 1 ॥

चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुङ्कुमरागशोणे ।
पुण्ड्रेक्षु पाशाङ्कुशपुष्पबाणहस्ते नमस्ते जगदेकमातः ॥ 2 ॥

॥ विनियोग॥

माता मरतकश्यामा मातंगी मदशालिनी ।
कुर्यात् कटाक्षं कल्याणी कदंबवनवासिनी ॥ 3 ॥

॥ स्तुति ॥

जय मातंगतनये जय नीलोत्पलद्युते ।
जय संगीतरसिके जय लीलाशुकप्रिये ॥ 4 ॥

॥ दण्डकं ॥

**श्यामळायाः मुखवर्ण्णनाः–**

जय जननी सुधासमुद्रान्तहृद्यन्मणिद्वीपसंरूढ–
बिल्वाटवीमद्ध्य कल्पद्रुमाकल्प कादंब कान्तारवासप्रिये !

कृत्तिवासप्रिये ! सर्व्वलोकप्रिये !

सादरारब्ध संगीतसंभावना संभ्रमालोल नीपस्रगाबद्धचूळीसनाथत्रिके! सानुमत्पुत्रिके!
शेखरीभूतशीतांशुरेखा मयूखावलीबद्ध–
सुस्निग्द्धनीलाळकश्रेणिशृंगारिते! लोकसंभाविते !

कामलीलाधनुस्सन्निभ भ्रूलता पुष्पसन्दोह सन्देहकृल्लोचने !
वक्सुधासेचने चारुगोरोचनापङ्ककेळीललामाभिरामे! सुरामे! रमे!

प्रोल्लसद्द्वाळिका मौक्तिकश्रेणिका चन्द्रिकामण्डलोत्भासिलावण्य गण्डस्थलन्यस्त
कस्तूरिकापत्ररेखा समुद्भूत सौरभ्य
संभ्रान्त भृंगांगनागीत सान्द्रीभवन्मन्त्र तन्त्रीस्वरे! सुस्वरे! भास्वरे!

वल्लकीवादन प्रिक्रियलोल ताळीदळाबद्ध ताटङ्कभूषा
विशेषान्विते! सिद्धसम्मानिते!

दिव्यहालामदोद्वेल हेलालसच्चक्षूरान्दोळन श्रीसमाक्षिप्तकर्ण्णैक–
नीलोत्पले! श्यामळे! पूरिताशेष लोकाभिवाञ्चाफले! निर्म्मले! श्रीफले!

स्वेदबिन्दूल्लसल् फाललावण्यनिष्यन्द सन्दोह सन्देह कृन्नासिकामौक्तिके!
सर्व्वविद्यात्मिके! सर्व्वसिद्ध्यात्मिके! सर्व्वमन्त्रात्मिके! कालिके!

मृग्धमन्दस्मितोदारवक्त्रस्फुरत् पूगतांबूलखण्डोत्करे! ज्ञानमुद्राकरे! सर्व्वसन्पत्करे!
पद्मभास्वत्करे! श्रीकरे!

कुन्दपुष्पद्युति स्निग्धदन्तावली निर्मलालोलकल्लोलसम्मेळन
स्मेरशोणाधरे! चारुवीणाधरे! पक्वबिंबाधरे!

**श्यामळायाः शरीरवर्ण्णनाः–**

सुलळित नवयौवनारंभ चन्द्रोदयोद्वेल लावण्यदुग्धार्ण्णवाविर्भवत्
कंबुबिंबोकभृत्कन्धरे! सत् कलामन्दिरे! मन्थरे!
दिव्यरत्नप्रभाबन्धुरच्छन्न हारादिभूषा समुद्योतमानानवद्यांगशोभे! शुभे!

रत्नकेयूररश्मिझचटापल्लव प्रोल्लासद्दोल्लताराजिते!
योगिभिः पूजिते!

विश्वदिङ्मण्डलव्यापि तमाणिक्यतेजःस्फुरत्कङ्कणालंकृते !

वासरारंभवेलासमुज्जृंभमाणारविन्द प्रतिद्वन्दि पाणिद्व्यये !
सन्ततोद्यद्दये ! अद्वये!

दिव्यरत्नोर्म्मिकादीधिति स्तोम सन्ध्यायमानांगुली पल्लवोद्यन्नखेन्दु प्रभामण्डले!
सन्नताखण्डले! चित्प्रभामण्डले! प्रोल्लसत्कुण्डले!

तारकाजाल नीकाश हारवलि स्मेरचारुस्तनाभोगभारनमन्मध्यवल्ली
वलिच्छेदेवीचीसमुल्लाससन्दर्शिताकार
सौन्दर्यरत्नाकरे! वल्लकीभृत्करे! किङ्करश्रीकरे!

हेमकुंभोपमोत्तुंग वक्षोजभारावनम्रे! त्रिलोकावनम्रे!
लसद्वृत्तगंभीरनाभी सरस्तीरशैवालशङ्काकर श्यामरोमावलीभूषणे! मञ्जुसंभाषणे!

चारुशिञ्चत्कटीसुत्रनिर्भत्सितानंगलीलाधनुश्शिञ्चिनीडंबरे!
दिव्यरत्नांबरे

पद्मरागोल्लसन्मेखला भास्वरश्रोणिशोभाजितास्वर्ण्णभूभृत्तले! चन्द्रिकाशीतले!

**श्यामळायाः पादान्तवर्ण्णनः–**

विकसित नवकिंशुकाताम्र दिव्याशुक्षच्छन्न
चारुरुशोभा पराभूतसिन्दूरशोणायमानेन्द्रमातङ्कह
स्ताग्गळे! वैभवानग्गळे! श्यामळे!
कोमळस्निग्द्ध निलोत्पलोत्पादितानंग तूणीरशङ्काकरोदार
जंघालते! चारुलीलागते!

नम्रदिक्पालसीमन्तिनीकुन्तळ स्निग्द्धनीलप्रभापुञ्चसञ्चात दुग्वाङ्कुराशङ्कसारंग
सयोगरिंखन्नखेन्दूज्ज्वले ! प्रोज्ज्वले ! निर्मले!

प्रह्व देवेश लक्ष्मीश भूतेश तोयेश वाणीश कीनाश
दैत्येश यक्षेश वाय्वग्नि कोटीरमाणिक्य संघृष्ट बालातपोद्दाम लाक्षारसारुण्य तारुण्य
लक्ष्मी गृहितांघ्रिपत्मे! सुपत्मे! उमे!

**श्यामळायाः सभामण्डपवर्ण्णनाः–**

सुरुचिरनवरत्न पीठस्तिते! सुस्थिते! रत्नपत्मासने! रत्नसिंहासने! शंखपद्मद्वयोपाश्रिते!
विश्रुते!
तत्र विघ्नेश दुर्गावटुक्षेत्रपलैर्युते! मत्तमातंगकन्यासमूहान्विते! भैरवैरष्टभिर्वेष्टिते!
मञ्जुळामेनकाद्यंगनामानिते!

देवि वामादिभिशक्तिभिस्सेविते! धात्रि लक्ष्म्यादिशक्त्यैष्टकैः संयुते!
मातृकामण्डलैर्मण्डिते!
यक्षगन्धर्वसिद्धांगना मण्डालैरर्च्चिते!

भैरवी संवृते! पञ्चबाणात्मिके! पञ्चबाणेन रत्या च
संभाविते! प्रीतिभाजा वसन्तेन चानन्दिते!

**श्यामळायाः विलासवर्ण्णनाः–**

भक्तिभाजां परं श्रेयसे कल्पसे! योगिनां मानसे द्योतसे छन्दसामोजसे! भ्राजसे!
गीतविद्या
विनोदाति तृष्णेन कृष्णेन संपूज्यसे! भक्तिमच्चेतसा वेधसास्तूयसे! विश्वहृद्येन वाद्येन
विद्याधरैऱ्गीयसे!

श्रवणहरदक्षिणक्वाणया वीणया किन्नरैऱ्गीयसे! यक्षगन्धऱ्वसिद्धांगना मण्डलैरऱ्च्च्यसे!
सऱ्वसौभाग्यवाञ्चावतीभिऱ् वधूभिऱ्स्सुराणां समाराध्यसे!

सऱ्वविद्याविशेषात्मकं चाटुगाथासमुच्चारणं कण्डमूलोल्लसद्वऱ्णराजित्रयं
कोमळश्यामळोदारपक्षद्वयं तुण्डशोभातिदूरिभवत् किंशुकं तं शुकं लाळयन्तीपरिक्रीडसे!

**श्यामळायाः सऱ्वैश्वर्यप्रदायकत्व वऱ्णनाः–**

पाणि पद्मद्वयेनाक्षमालामपि स्फाटिकीं ज्ञानसारात्मकं
पुस्तकां चापरेणाङ्कुशं पाशमाबिभूति येन सञ्चिन्त्यसे चेतसा तस्य वक्त्रान्तरात्
गद्यपद्यात्मिका भरती निस्सरेत्! येन वा यावकाभाकृतिऱ् भाव्यसे
तस्यवश्या भवन्ति स्त्रियः पुरुषाः! येन वा शातकुंभद्युतिऱ् भाव्यसे सोऽपि लक्ष्मीसहस्रैः
परिकीटिते!

किं न सिद्ध्येत्वपुः श्यामळं कोमळं चन्द्रचूडान्वितं
तावकं ध्ययतः तस्य लिलासरो वारिधिः तस्य केळीवनं
नन्दनं तस्य भद्रासनं भुतलं तस्य गीऱ्देवता किङ्करी
तस्य चाज्ञाकरी श्रीः स्वयं.

**श्यामळायाः सऱ्वात्मकत्व वऱ्णनाः–**

सऱ्व तीऱ्थात्मिके! सऱ्व मन्त्रात्मिके!
सऱ्व यन्त्रात्मिके! सऱ्व तन्त्रात्मिके!

सर्व्व चक्रात्मिके! सर्व्व शक्त्यात्मिके!
सर्व्व पीठात्मिके! सर्व्व वेदात्मिके!

सर्व्व विद्यात्मिके सर्व्व योगात्मिके!
सर्व्व नादात्मिके सर्व्व वर्ण्णात्मिके!

सर्व्व शब्दात्मिके! सर्व्व विश्वात्मिके!
सर्व्व दीक्षात्मिके! सर्व्व सर्व्वात्मिके!

सर्व्वगे! सर्व्वरूपे! जगन्मातृके!
पाहि मां पाहि मां पाहि मां देवी!

तुभ्यं नमो देवी! तुभ्यं नमो देवी! तुभ्यं नमो देवी! तुभ्यं नमः

॥ इति श्रीमद् काळिदासप्रणीतं श्री श्यमळा दण्डकं सन्पूर्ण्णं ॥